# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३, सेमेस्टर-५ | प्रश्नपत्रम् - ५ | गुणाः - ७० |
| विषयः - स्वामिनारायणवेदान्तः (S) | कोड - CC-3.5.9 | समयः - ११-०२ |
| दिनाङ्कः - २९.११.२०१६ | ग्रन्थः - श्रीहरिवाक्यसुधासिन्धुः सेतुमालाटीकासहितः | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ त्रिषु द्वौ विषयौ व्याख्यात । ०८**

(१) *प्रकृतिपुरुषः ।*

(२) *प्रलयचतुष्टयम् ।*

(३) *भगवद्धामवर्णनम् ।*

**प्रश्नः २ द्वयोरेकस्य विषयस्य सारांशं लिखत । ०८**

(१) *विश्वोत्पत्तिः ।*

(२) *ब्रह्मधामस्वरूप-तद्गतमुक्तस्वरूप-अस्मल्लक्ष्यपर्यन्तम् ।*

**प्रश्नः ३ द्वयोरेकं टीप्पयत । ०२**

*(१) मनसो लक्षणम् ।* *(२) आकाशलक्षणम् ।*

**प्रश्नः ४ चतुर्षु द्वौ संक्षेपेणोत्तरत । ०२**

(१) *सेतुमालाटीकालेखकः कः ?*

(२) *के पञ्च महाभूतानि ?*

(३) *ईश्वरस्य शरीराणि कानि ?*

(४) *देहजातयः कति ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ त्रिषु द्वौ विषयौ ससन्दर्भं व्याख्यात । ०८**

(१) *महामाया - महापुरुष - अक्षरब्रह्मवर्णनम् ।*

(२) *निश्चये न्यूनतायुक्तस्य सङ्कल्पाः ।*

(३) *तत्त्वतो निश्चयवतो लक्षणानि ।*

**प्रश्नः ६ द्वयोरेकं विषयं वर्णयत । ०८**

(१) *एकोऽहं बहु स्याम वाक्यतात्पर्यम् ।*

(२) *मायिकैः करणैर्हरेर्दर्शनं सम्भवे न्नवा, न सम्भवेत् चेत् केन प्रकारेण सम्भवेत् ?*

**प्रश्नः ७ चतुर्षु द्वौ श्लोकौ टीप्पयत । ०४**

(१) *अतो नित्याश्चेतनाश्च जीवा ईशानश्च सर्वशः ।*
*कृष्णाद्भिन्ना भवन्तीति श्रीभाष्ये निर्णयः कृतः ॥*

(२) *तदात्मनेक्षिताच्चास्माद् भूतार्थेन्द्रियदेवताः ।*
*कृष्णेनाविर्भवन्ति स्म तैर्विराण्महदादिभिः ॥*

(३) *सर्वात्मात्मा स्वतन्त्रश्च सर्वशक्तिपतिः प्रभुः ।*
*परात्परतरः शुद्धः ईश्वराणामपीश्वरः ॥*

(४) *पुरुषादक्षरं ब्रह्म वर्तते हि महत्तरम् ।*
*अणुवत्परिवर्तन्ते यत्र ब्रह्माण्डकोटयः ॥*

**प्रश्नः ८ सप्तसु पञ्चोत्तरत ।** ०५

*(१) ४१ तमे वचनामृते वेदस्तुतेः कः श्लोक उद्धृतः ?*
*(२) पात्रानुगुणप्रवेशे को दृष्टान्तः ?*
*(३) पृथिवी कतियोजनविस्तृता ?*
*(४) अक्षरात्परतरः परः कस्या उपनिषदा मन्त्रः ?*
*(५) ६३ वचनामृतप्रारम्भे वस्त्राणां हरिधृतानां को वर्णः ?*
*(६) ६३ वचनामृते परमचैतन्यानन्दस्वामिनः कः प्रश्नः ?*
*(७) मत्तः परतरं...... श्लोकः कस्य ग्रन्थस्य ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ त्रिषु द्वौ श्लोकौ ससन्दर्भौ व्याख्याते ।** ०८

(१) *अतोऽरूपमलिङ्गञ्च निराकारं तदुच्यते ।।*
*मूर्तं च कृष्णधामत्वान्मुक्ताधारतया च तत् ॥*

(२) *कृष्ण एव ततः सेव्यो ब्रह्मात्मज्ञानिनाऽपि हि ।*
*ब्रह्मविदाप्नोति परमित्यादि श्रुतिशासनात् ॥*

(३) *पृथिव्यादिचतुष्कस्य धारकव्यापकत्वतः ।*
*आधारोऽस्ति यथाऽऽकाशः शक्तिद्वययुतः सदा ॥*

**प्रश्नः १०** *अक्षरब्रह्मणः परब्रह्मणो वा माहात्म्यं ६३ तरङ्गानुसारेण वर्णयत ।* ०८

**प्रश्नः ११ चतुर्षु द्वौ टीप्पयत ।** ०४

*(१) ६३ तरङ्गानुसारं मुक्तस्वरूपम् ।*
*(२) ६३ तरङ्गानुसारं निश्चयिर्लक्षणानि ।*
*(३) ६३ तरङ्गानुसारं भगवदवतरणरीतिः ।*
*(४) ११५ तरङ्गानुसारं केन ज्ञानेन मुक्तिः ? तज्ज्ञानवर्णनम् ।*

**प्रश्नः १२ सप्तसु पञ्चोत्तरत ।** ०५

*(१) ६३ तरङ्गे अक्षरब्रह्मणः कतिरूपाणि ?*
*(२) ज्ञानेन मुक्तौ का श्रुतिरुदाहृता ?*
*(३) वेदनं कति प्रकारेण ?*
*(४) यस्मात् क्षरम....श्लोकपूर्तिः करणीया ।*
*(५) भक्तियुक्तेन के तीर्णाः ?*
*(६) ध्रुववचनं कस्मात् शास्त्रात् उद्धृतम् ?*
*(७) प्रकृतिः कतिविधा ?*

=०=